shrIshyAmadevastavaH

# श्रीश्यामदेवस्तवः

## Document Information

Text title : shyAmadevastavaH

File name : shyAmadevastava.itx

Category : deities_misc

Location : doc_deities_misc

Author : ShyAmabhakta khATunivAsI paNDit rAmaprasAda sharmA

Transliterated by : anonymous456an at gmail.com

Proofread by : anonymous456an at gmail.com

Description-comments : shyAmadevopAsana Puja book by Shri Kishor Mishra

Latest update : October 2, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 2, 2020

*sanskritdocuments.org*

# श्रीश्यामदेवस्तवः

ॐ अस्य श्रीश्यामदेवस्तोत्रमन्त्रस्य ब्रह्मा ऋषिः ।
अत्यष्टिः (शिखरिणी) छन्दः । श्रीश्यामो देवता ।
सकलमनोरथसिद्ध्यर्थे श्रीश्यामदेवताप्रीत्यर्थे च जपे विनियोगः ।

शिवब्रह्मेन्द्राद्यैरखिलसुरवर्यैरिह सदा
मुनीन्द्रैः सिद्धेन्द्रैर्भृगुकपिलमुख्यैः स्तुतपदम् ।
दयायुक्तं नाथं नरकपतितोद्धारणपरं
भजेऽहं श्रीश्यामं भवभयहरं भक्तवरदम् ॥ १॥

महोत्साहं विष्णुं शुभशशिमुखं पद्मनयनं
किरीटाढ्यं कान्त्यावृततनुमनन्तं गुणनिधिम् ।
विना प्राक्पुण्योघैर्दुरधिगमनिःसीमविभवं
भजेऽहं श्रीश्यामं भवभयहरं भक्तवरदम् ॥ २॥

सदा वंशीवाद्यं सजलजलदाभं सुचरितं
मुदा गोपीगोपाद्यभयवरदं दुष्टदमनम् ।
बकीनाशं कृष्णं ह्यघवकतृणावर्तकरिपुं
भजेऽहं श्रीश्यामं भवभयहरं भक्तवरदम् ॥ ३॥

मनोज्ञं कंसारिं करिकुवलयापीडदमनं
हरिं रङ्गे यान्तं कठिनतरचाणूप्रशमनम् ।
स्वपित्रोरानन्दं ददतमधिकं प्रीतिजनकं
भजेऽहं श्रीश्यामं भवभयहरं भक्तवरदम् ॥ ४॥

मुदाभिर्नारीभिर्मुदितनटनाट्यैकनिपुणं
क्वणत्काञ्चीकान्तिक्वणितसुखसङ्गीतकवरम् ।
शुभं तं कौशेयाम्बरधरमुदारं वनगतं
भजेऽहं श्रीश्यामं भवभयहरं भक्तवरदम् ॥ ५॥

सुकालिन्दीकूले घनतरतरौ स्वच्छरजसि
स्फुटज्जातीपद्मे सुरभिणि सदा कुञ्जनिलये ।
लसन्तं गोपीभिः शरदि सुरनारीभिरमलं
भजेऽहं श्रीश्यामं भवभयहरं भक्तवरदम् ॥ ६॥

पिबन्तं दावाग्निं शमनमखिलानां च विपदां
पदं तत्सौख्यानां प्रचुरतरकालीयदमनम् ।
हरन्तं सन्तापं व्रजजनवराणां सुतपसां
भजेऽहं श्रीश्यामं भवभयहरं भक्तवरदम् ॥ ७॥

सुशैलेन्द्रं हस्ते दधतमनिशं सप्तदिवसं
जनानां स्वीयानां विविधविपदां सङ्क्षयकरम् ।
गवां त्राणार्थं वै गिरिवरधरं नन्दतनयं
भजेऽहं श्रीश्यामं भवभयहरं भक्तवरदम् ॥ ८॥

सुरेशं गोविन्दं मणिकनकहाराङ्गदधरं
सुपिच्छापीडं कौस्तुभरुचिरवक्षःपरिसरम् ।
रमेशं लोकानां हितकरमलं विश्वजनकं
भजेऽहं श्रीश्यामं भवभयहरं भक्तवरदम् ॥ ९॥

चिदानन्दाकारं मुनिवरहृदि प्राप्तनिलयं
यजुःसामाथर्वप्रभृतिषु तथा ऋक्षु विदितम् ।
अचिन्त्यं दुर्बोधं प्रकृतिगुणयुक्तैश्च पुरुषै-
र्भजेऽहं श्रीश्यामं भवभयहरं भक्तवरदम् ॥ १०॥

स्तवः श्यामदेवस्य विष्णोर्मयाऽयं
कृतो दिङ्मितैः शुद्धभावेन पद्यैः ।
सुरामप्रसादाभिधानेन यायात्
पठेद्यो नरः श्यामदेवप्रसादम् ॥ ११॥

॥ इति श्रीश्यामदेवस्तवः सम्पूर्णः ॥

भगवान् श्रीश्यामदेव राजस्थान के अतिप्रसिद्ध देवता हैं और लाखों घरों के कुलदेव, इष्टदेव हैं । श्रीश्यामदेव को कथा संस्कृतसाहित्य के अनुपम निधि पुराणों में उपलब्ध हैं। श्रीश्यामप्रभु की विस्तृत कथा महर्षि वेदव्यास-रचित अष्टादश महापुराणों में से अन्यतम, प्रधान स्कन्द-पुराण के

कौमारिकाखण्ड में मिलती है । यह कथा पाँच अध्यायों (३४५
श्लोकों) में है, जो अतीव सुन्दर, रोचक एवं उपदेशप्रद है ।
इसके अतिरिक्त भारतसार में भी संक्षिप्त श्रीश्यामदेवकथा
दो अध्यायों (४६ श्लोकों) में किञ्चित् रूपान्तर से उपलब्ध होती है ।

Encoded and proofread by anonymous456an at gmail.com

*shrIshyAmadevastavaH*

pdf was typeset on October 2, 2020

Please send corrections to *sanskrit@cheerful.com*